# कारक-विभक्ति-परिचयः

वाक्ये क्रियायाः साक्षात् अन्वयः येन पदेन/शब्देन सह भवति तत् पदं कारकं भवति। कारकाणाम् अर्थं प्रकटयितुं येषां प्रत्ययानां संयोजनं शब्दैः सह भवति ते (प्रत्ययाः) कारक-विभक्तयः भवन्ति।

यथा- छात्राः![11] दशरथस्य[10] सुतः[1] रामः[2] दण्डकारण्यात्[8] लङ्कां[3] गत्वा युद्धे[9] रावणं[4] बाणेन[6] हत्वा विभीषणाय[7] लङ्काराज्यम्[5] अयच्छत्[12]।

| क्रमसंख्या | शब्दाः/पदानि | कारकम् | विभक्तिः |
|---|---|---|---|
| 1, 2 | सुतः, रामः | कर्ता | प्रथमा |
| 3, 4, 5 | लङ्कां, रावणं, लङ्काराज्यम् | कर्म | द्वितीया |
| 6 | वाणेन | करणम् | तृतीया |
| 7 | विभीषणाय | सम्प्रदानम् | चतुर्थी |
| 8 | दण्डकारण्यात् | अपादानम् | पञ्चमी |
| 9 | युद्धे | अधिकरणम् | सप्तमी |

विशेषः- षष्ठी-विभक्तेः अर्थ सम्बन्धः अस्ति। सम्बन्धः सम्बोधनं च कारकं न भवति। उदाहरणम्-'दशरथस्य'[10] 'हे छात्राः'[11] इति पदयोः साक्षात् अन्वयः क्रियया 'अयच्छत्'[12] इत्यनेन पदेन सह नास्ति। अतः संस्कृते एते पदे कारके न भवतः।



© NCERT not to be republished



## शब्दरूपाणि

### अकारान्त-पुँल्लिङ्ग-शब्दः

#### बालक

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | बालकः | बालकौ | बालकाः |
| द्वितीया | बालकम् | बालकौ | बालकान् |
| तृतीया | बालकेन | बालकाभ्याम् | बालकैः |
| चतुर्थी | बालकाय | बालकाभ्याम् | बालकेभ्यः |
| पञ्चमी | बालकात् | बालकाभ्याम् | बालकेभ्यः |
| षष्ठी | बालकस्य | बालकयोः | बालकानाम् |
| सप्तमी | बालके | बालकयोः | बालकेषु |
| सम्बोधनम् | हे बालक! | हे बालकौ! | हे बालकाः! |

एवमेव नृप-देव-राम-पितामह-पण्डित-इत्यादीनाम् अकारान्त-पुँल्लिङ्ग-शब्दानां रूपाणि भवन्ति।

### आकारान्त-स्त्रीलिङ्ग-शब्दः

#### बालिका

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | बालिका | बालिके | बालिकाः |
| द्वितीया | बालिकाम् | बालिके | बालिकाः |
| तृतीया | बालिकया | बालिकाभ्याम् | बालिकाभिः |
| चतुर्थी | बालिकायै | बालिकाभ्याम् | बालिकाभ्यः |

© NCERT not to be republished



| | | | |
|---|---|---|---|
| **पञ्चमी** | बालिकायाः | बालिकाभ्याम् | बालिकाभ्यः |
| **षष्ठी** | बालिकायाः | बालिकयोः | बालिकानाम् |
| **सप्तमी** | बालिकायाम् | बालिकयोः | बालिकासु |
| **सम्बोधनम्** | हे बालिके! | हे बालिके! | हे बालिकाः! |

एवमेव लता-रमा-माला-कलिका-इत्यादीनाम् आकारान्त-स्त्रीलिङ्ग-शब्दानां रूपाणि भवन्ति।


## अकारान्त-नपुंसकलिङ्ग-शब्दः

### पुष्प

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | पुष्पम् | पुष्पे | पुष्पाणि |
| **द्वितीया** | पुष्पम् | पुष्पे | पुष्पाणि |
| **तृतीया** | पुष्पेण | पुष्पाभ्याम् | पुष्पैः |
| **चतुर्थी** | पुष्पाय | पुष्पाभ्याम् | पुष्पेभ्यः |
| **पञ्चमी** | पुष्पात् | पुष्पाभ्याम् | पुष्पेभ्यः |
| **षष्ठी** | पुष्पस्य | पुष्पयोः | पुष्पाणाम् |
| **सप्तमी** | पुष्पे | पुष्पयोः | पुष्पेषु |
| **सम्बोधनम्** | हे पुष्प! | हे पुष्पे! | हे पुष्पाणि। |

एवमेव फल-पुस्तक-नगर-मित्र-उद्यान-इत्यादीनाम् अकारान्त-नपुंसकलिङ्ग-शब्दानां रूपाणि भवन्ति।

© NCERT not to be republished





# इकारान्त-पुँल्लिङ्ग-शब्दः

## मुनि

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | मुनिः | मुनी | मुनयः |
| **द्वितीया** | मुनिम् | मुनी | मुनीन् |
| **तृतीया** | मुनिना | मुनिभ्याम् | मुनिभिः |
| **चतुर्थी** | मुनये | मुनिभ्याम् | मुनिभ्यः |
| **पञ्चमी** | मुनेः | मुनिभ्याम् | मुनिभ्यः |
| **षष्ठी** | मुनेः | मुन्योः | मुनीनाम् |
| **सप्तमी** | मुनौ | मुन्योः | मुनिषु |
| **सम्बोधनम्** | हे मुने! | हे मुनी! | हे मुनयः! |

एवमेव कवि-हरि-रवि-कपि-इत्यादीनाम् इकारान्त-पुँल्लिङ्ग-शब्दानां रूपाणि भवन्ति।

# उकारान्त-पुँल्लिङ्ग-शब्दः

## भानु

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | भानुः | भानू | भानवः |
| **द्वितीया** | भानुम् | भानू | भानून् |
| **तृतीया** | भानुना | भानुभ्याम् | भानुभिः |
| **चतुर्थी** | भानवे | भानुभ्याम् | भानुभ्यः |
| **पञ्चमी** | भानोः | भानुभ्याम् | भानुभ्यः |
| **षष्ठी** | भानोः | भान्वोः | भानूनाम् |
| **सप्तमी** | भानौ | भान्वोः | भानुषु |
| **सम्बोधनम्** | हे भानो! | हे भानू! | हे भानवः! |

एवमेव शिशु-साधु-गुरु-विष्णु-इत्यादीनाम् उकारान्त-पुँल्लिङ्ग-शब्दानां रूपाणि भवन्ति।

© NCERT not to be republished



# धातु-रूपाणि

## पठ् (पढ़ना)

### लट्लकारः (वर्तमानकालः)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | पठति | पठतः | पठन्ति |
| **मध्यमपुरुषः** | पठसि | पठथः | पठथ |
| **उत्तमपुरुषः** | पठामि | पठावः | पठामः |

### लृट्लकारः (भविष्यत्कालः)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| **मध्यमपरुषः** | पठिष्यसि | पठिष्यथः | पठिष्यथ |
| **उत्तमपुरुषः** | पठिष्यामि | पठिष्यावः | पठिष्यामः |

### लङ्लकारः (अतीतकालः)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | अपठत् | अपठताम् | अपठन् |
| **मध्यमपुरुषः** | अपठः | अपठतम् | अपठत |
| **उत्तमपुरुषः** | अपठम् | अपठाव | अपठाम |

© NCERT not to be republished





## लोट्लकारः ( अनुज्ञा/आदेशः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | पठतु | पठताम् | पठन्तु |
| **मध्यमपुरुषः** | पठ | पठतम् | पठत |
| **उत्तमपुरुषः** | पठानि | पठाव | पठाम |

एवमेव हस्, चल्, खेल्, खाद्, पा (पिब), दृश् (पश्य), धाव्, पत्, भ्रम्, लिख्, इष् (इच्छा), मिल्–प्रभृतीनां धातूनां रूपाणि भवन्ति।

## गम्–गच्छ् (जाना)


### लट्लकारः ( वर्तमानकालः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | गच्छति | गच्छतः | गच्छन्ति |
| **मध्यमपुरुषः** | गच्छसि | गच्छथः | गच्छथ |
| **उत्तमपुरुषः** | गच्छामि | गच्छावः | गच्छामः |

### लृट्लकारः ( भविष्यत्कालः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | गमिष्यति | गमिष्यतः | गमिष्यन्ति |
| **मध्यमपरुषः** | गमिष्यसि | गमिष्यथः | गमिष्यथ |
| **उत्तमपुरुषः** | गमिष्यामि | गमिष्यावः | गमिष्यामः |

© NCERT not to be republished



### लङ्लकारः ( अतीतकालः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | अगच्छत् | अगच्छताम् | अगच्छन् |
| **मध्यमपुरुषः** | अगच्छः | अगच्छतम् | अगच्छत |
| **उत्तमपुरुषः** | अगच्छम् | अगच्छाव | अगच्छाम |

### लोट्-लकारः ( अनुज्ञा/आदेशः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | गच्छतु | गच्छताम् | गच्छन्तु |
| **मध्यमपुरुषः** | गच्छ | गच्छतम् | गच्छत |
| **उत्तमपुरुषः** | गच्छानि | गच्छाव | गच्छाम |

## स्था-तिष्ठ (ठहरना)

### लट्लकारः ( वर्तमानकालः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपरुषः** | तिष्ठति | तिष्ठतः | तिष्ठन्ति |
| **मध्यमपुरुषः** | तिष्ठसि | तिष्ठथः | तिष्ठथ |
| **उत्तमपुरुषः** | तिष्ठामि | तिष्ठावः | तिष्ठामः |

© NCERT not to be republished





## लृट्लकारः ( भविष्यत्कालः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | स्थास्यति | स्थास्यतः | स्थास्यन्ति |
| **मध्यमपुरुषः** | स्थास्यसि | स्थास्यथः | स्थास्यथ |
| **उत्तमपुरुषः** | स्थास्यामि | स्थास्यावः | स्थास्यामः |

## लङ्लकारः ( अतीतकालः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | अतिष्ठत् | अतिष्ठताम् | अतिष्ठन् |
| **मध्यमपुरुषः** | अतिष्ठः | अतिष्ठतम् | अतिष्ठत |
| **उत्तमपुरुषः** | अतिष्ठम् | अतिष्ठाव | अतिष्ठाम |

## लोट्-लकारः ( अनुज्ञा/आदेशः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | तिष्ठतु | तिष्ठताम् | तिष्ठन्तु |
| **मध्यमपुरुषः** | तिष्ठ | तिष्ठतम् | तिष्ठत |
| **उत्तमपुरुषः** | तिष्ठानि | तिष्ठाव | तिष्ठाम |

© NCERT not to be republished



# नी-नय् (लेना)

## लट्लकारः (वर्तमानकालः)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | नयति | नयतः | नयन्ति |
| **मध्यमपुरुषः** | नयसि | नयथः | नयथ |
| **उत्तमपुरुषः** | नयामि | नयावः | नयामः |


## लृट्लकारः (भविष्यत्कालः)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | नेष्यति | नेष्यतः | नेष्यन्ति |
| **मध्यमपुरुषः** | नेष्यसि | नेष्यथः | नेष्यथ |
| **उत्तमपुरुषः** | नेष्यामि | नेष्यावः | नेष्यामः |

## लङ्लकारः (अतीतकालः)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | अनयत् | अनयताम् | अनयन् |
| **मध्यमपुरुषः** | अनयः | अनयतम् | अनयत |
| **उत्तमपुरुषः** | अनयम् | अनयाव | अनयाम |

© NCERT not to be republished





## लोट्-लकारः ( अनुज्ञा/आदेशः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | नयतु | नयताम् | नयन्तु |
| मध्यमपुरुषः | नय | नयतम् | नयत |
| उत्तमपुरुषः | नयानि | नयाव | नयाम |

# चिन्त् (सोचना)

## लट्लकारः ( वर्तमानकालः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | चिन्तयति | चिन्तयतः | चिन्तयन्ति |
| मध्यमपरुषः | चिन्तयसि | चिन्तयथः | चिन्तयथ |
| उत्तमपुरुषः | चिन्तयामि | चिन्तयावः | चिन्तयामः |

## लृट्लकारः ( भविष्यत्कालः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | चिन्तयिष्यति | चिन्तयिष्यतः | चिन्तयिष्यन्ति |
| मध्यमपुरुषः | चिन्तयिष्यसि | चिन्तयिष्यथः | चिन्तयिष्यथ |
| उत्तमपुरुषः | चिन्तयिष्यामि | चिन्तयिष्यावः | चिन्तयिष्यामः |

© NCERT not to be republished







## लङ्लकारः (अतीतकालः)


| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | अचिन्तयत् | अचिन्तयताम् | अचिन्तयन् |
| **मध्यमपुरुषः** | अचिन्तयः | अचिन्तयतम् | अचिन्तयत |
| **उत्तमपुरुषः** | अचिन्तयम् | अचिन्तयाव | अचिन्तयाम |

## लोट्-लकारः (अनुज्ञा/आदेशः)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | चिन्तयतु | चिन्तयताम् | चिन्तयन्तु |
| **मध्यमपुरुषः** | चिन्तय | चिन्तयतम् | चिन्तयत |
| **उत्तमपुरुषः** | चिन्तयानि | चिन्तयाव | चिन्तयाम |

उपर्युक्तानुसारमेव हस्, चल्, खेल्, खाद्, पा, दृश्, धाव्, पत्, भ्रम्, लिख्, इष्, मिल्-प्रभृतीनां धातूनां रूपाणि भवन्ति।

© NCERT not to be republished



# टिप्पणी

© NCERT
not to be republished



# टिप्पणी

© NCERT not to be republished

